# Utkalikavallarih

# ઉત્કલિકાવલ્લરીઃ

## Document Information

Text title : utkalikAvallarIH

File name : utkalikAvallarIH.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA, vishnu

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# ઉત્કલિકાવલ્લરીઃ

શ્રીવૃન્દારણ્યવિહારિણે નમઃ ।

પ્રપદ્ય વૃન્દાવનમધ્યમેકઃ
    ક્રોશન્નસાવુત્કલિકાકુલાત્મા ।
ઉદ્ઘાટયામિ જ્વલતઃ કઠોરાં
    બાષ્પસ્ય મુદ્રાં હૃદિ મુદ્રિતસ્ય ॥ ૧॥

અયે વૃન્દારણ્ય ત્વરિતમિહ તે સેવનપરાઃ
    પરામાપુઃ કે વા ન કિલ પરમાનન્દપદવીમ્ ।
અતો નીચૈર્યાચે સ્વયમધિપયોરીક્ષણવિધે-
    ર્વરેણ્યાં મે ચેતસ્યુપદિશ દિશં હા કુરુ કૃપામ્ ॥ ૨॥

તવારણ્યે દેવિ ધ્રુવમિહ મુરારિપોર્વિહરતે
    સદા પ્રેયસ્યેતિ શ્રુતિરપિ વિરૌતિ સ્મૃતિરપિ ।
ઇતિ જ્ઞાત્વા વૃન્દે ચરણમભિવન્દે તવ કૃપાં
    કુરુષ્વ ક્ષિપ્રં મે ફલતુ નિતરાં તર્ષવિટપી ॥ ૩॥

હૃદિ ચિરવસદાશામણ્ડલાલમ્બપાદૌ
    ગુણવતિ તવ નાથૌ નાથિતું જન્તુરેષઃ ।
સપદિ ભવદનુજ્ઞાં યાચતે દેવિ વૃન્દે
    મયિ કિર કરુણાર્દ્રાં દૃષ્ટિમત્ર પ્રસીદ ॥ ૪॥

દધતં વપુરંશુકન્દલીં
    દલદિન્દીવરવૃન્દબન્ધુરામ્ ।
કૃતકાઞ્ચનકાન્તિવઞ્ચનૈઃ
    સ્ફુરિતાં ચારુમરીચિસઞ્ચયૈઃ ॥ ૫॥

નિચિતં ઘનચઞ્ચલાતતે-
    રનુકૂલેન દુકૂલરોચિષા ।
મૃગનાભિરુચઃ સનાભિના

મહિતાં મોહનપટ્ટવાસસા ॥ ૬॥

માધુરીં પ્રકટયન્તમુજ્જ્વલાં
શ્રીપતેરપિ વરિષ્ઠસૌષ્ઠવામ્ ।
ઇન્દિરામધુરગોષ્ઠસુન્દરી
વૃન્દવિસ્મયકરપ્રભોન્નતામ્ ॥ ૭॥

ઇતરજનદુર્ઘટોદયસ્ય
સ્થિરગુણરત્નચયસ્ય રોહણાદ્રિમ્ ।
અખિલગુણવતીકદમ્બચેતઃ
પ્રચુરચમત્કૃતિકારિસદ્ગુણાઢ્યમ્ ॥ ૮॥

નિસ્તુલવ્રજકિશોરમણ્ડલી
મૌલિમણ્ડનહરિન્મણીશ્વરમ્ ।
વિશ્વવિસ્ફૂરિતગોકુલોલ્લસન્
નવ્યયૌવતવતંસમાલિકામ્ ॥ ૯॥

સ્વાન્તસિન્ધુમકરીકૃતરાધં
હૃન્નિશાકરકુરઙ્ગિતકૃષ્ણામ્ ।
પ્રેયસીપરિમલોન્મદચિત્તં
પ્રેષ્ઠસૌરભહૃતેન્દ્રિયવર્ગામ્ ॥ ૧૦॥

પ્રેમમૂર્તિવરકાર્ત્તિકદેવી
કીર્તિગાનમુખરીકૃતવંશમ્ ।
વિશ્વનન્દનમુકુન્દસમજ્ઞા
વૃન્દકીર્તનરસજ્ઞરસજ્ઞામ્ ॥ ૧૧॥

નયનકમલમાધુરીનિરુદ્ધ
વ્રજનવયૌવતમૌલિહૃન્મરાલમ્ ।
વ્રજપતિસુતચિત્તમીનરાજ
ગ્રહણપટિષ્ઠવિલોચનાન્તજાલામ્ ॥ ૧૨॥

ગોપેન્દ્રમિત્રતનયાધ્રુવધૈર્યસિન્ધુ
પાનક્રિયાકલસસમ્ભવવેણુનાદમ્ ।
વિદ્યામહિષ્ઠમહતીમહનીયગાન
સમ્મોહિતાખિલવિમોહનહૃત્કુરઙ્ગામ્ ॥ ૧૩॥

ક્વાપ્યાનુસઙ્ગિકતયોદિતરાધિકાખ્યા
　વિસ્મારિતાખિલવિલાસકલાકલાપમ્ ।
કૃષ્ણેતિવર્ણયુગલશ્રવણાનુબન્ધ
　પ્રાદુર્ભવજ્જડિમડમ્બરસંવિતાઙ્ગીમ્ ॥ ૧૪॥

ત્વાં ચ વલ્લવપુરન્દરાત્મજ
　ત્વાં ચ ગોકુલવરેણ્યનન્દિનિ ।
એષ મૂર્ધ્નિ રચિતાઞ્જલિર્નયન્
　ભિક્ષતે કિમપિ દુર્ભગો જનઃ ॥ ૧૫॥

હન્ત સાન્દ્રકરુણાસુધાઝરી
　પૂર્ણમાનસહ્રદૌ પ્રસીદતમ્ ।
દુર્જનેઽત્ર દિશતં રતે નિજ
　પ્રેક્ષણપ્રતિભુવશ્છટામપિ ॥ ૧૬॥

શ્યામયોર્નવવયઃસુષમાભ્યાં
　ગૌરયોરમલકાન્તિયશોભ્યામ્ ।
ક્વાપિ વામખિલવલ્ગુવતંસૌ
　માધુરી હૃદિ સદા સ્ફુરતાન્ મે ॥ ૧૭॥

સર્વવલ્લવવરેણ્યકુમારૌ
　પ્રાર્થયે બત યુવાં પ્રણિપત્ય ।
લીલયા વિતરતં નિજદાસ્યં
　લીલયા વિતરતં નિજદાસ્યમ્ ॥ ૧૮॥

પ્રણિપત્ય ભવન્તમર્થયે
　પશુપાલેન્દ્રકુમાર કાકુભિઃ ।
વ્રજયૌવતમૌલિમાલિકા
　કરુણાપાત્રમિમં જનં કુરુ ॥ ૧૯॥

ભવતીમભિવાદ્ય ચાટુભિ-
　ર્વરમૂર્જેશ્વરિ વર્યમર્થયે ।
ભવદીયતયા કૃપાં યથા
　મયિ કુર્યાદધિકાં બકાન્તકઃ ॥ ૨૦॥

દિશિ વિદિશિ વિહારમાચરન્તઃ
　સહ પશુપાલવરેણ્યનન્દનાભ્યામ્ ।

પ્રણયિજનગણાસ્તયોઃ કુરુધ્વં
    મયિ કરુણાં બત કાકુમાકલય્ય ॥ ૨૧॥

ગિરિકુઞ્જકુટીરનાગરૌ
    લલિતે દેવિ સદા તવાશ્રવૌ ।
ઇતિ તે કિલ નાસ્તિ દુષ્કરં
    કૃપયાઙ્ગીકુરુ મામતઃ સ્વયમ્ ॥ ૨૨॥

ભાજનં વરમિહાસિ વિશાખે
    ગૌરનીલવપુષોઃ પ્રણયાનામ્ ।
ત્વં નિજપ્રણયિનોર્મયિ તેન
    પ્રાપયસ્વ કરુણાર્દ્રકટાક્ષમ્ ॥ ૨૩॥

સુબલ વલ્લવવર્યકુમારયો-
    ર્દયિતસખસ્ત્વમસિ વ્રજે ।
ઇતિ તયોઃ પુરતો વિધુરં જનં
    ક્ષણમમું કૃપયાદ્ય નિવેદય ॥ ૨૪॥

શ‍ૃણુત કૃપયા હન્ત પ્રાણેશયોઃ પ્રણયોદ્ધુરાઃ
    કિમપિ યદયં દીનઃ પ્રાણી નિવેદયતિ ક્ષણમ્ ।
પ્રવણિતમનાઃ કિં યુષ્માભિઃ સમં તિલમપ્યસૌ
    યુગપદનયોઃ સેવાં પ્રેમ્ણા કદાપિ વિધાસ્યતિ ॥ ૨૫॥

ક્વ જનોઽયમતીવ પામરઃ
    ક્વ દુરાપં રતિભાગ્ભિરપ્યદઃ ।
ઇયમુલ્લયત્યજર્જરા ગુરુ-
    રુત્તર્ષધુરા તથાપિ મામ્ ॥ ૨૬॥

ધ્વન્તબ્રહ્મમરાલકૂજિતભરૈરૂર્જેશ્વરીનૂપુર
    ક્વાનૈરૂર્જિતવૈભવસ્તવ વિભો વંશીપ્રસૂતઃ કલઃ ।
લબ્ધઃ શસ્તસમસ્તનાદનગરીસામ્રાજ્યલક્ષ્મીં પરાં
    આરાધ્યઃ પ્રણયાત્ કદા શ્રવણયોર્દ્વન્દ્વેન મન્દેન મે ॥ ૨૭॥

સ્તમ્ભં પ્રપઞ્ચયતિ યઃ શિખિપિઞ્છમૌલિ
    વેણોરપિ પ્રવલયન્ સ્વરભઙ્ગમુચ્ચૈઃ ।
નાદઃ કદા ક્ષણમવાપ્સ્યતિ તે મહત્યા
    વૃન્દાવનેશ્વરિ સ મે શ્રવણાતિથિત્વમ્ ॥ ૨૮॥

કસ્ય સમ્ભવતિ હા તદહર્વા
    યત્ર વાં પ્રભુવરૌ કલગીતિઃ ।
ઉન્નમન્ મધુરિમોર્મિસમૃદ્ધા
    દુષ્કૃતં શ્રવણયોર્વિધુનોતિ ॥ ૨૯॥

પરિમલસરણિર્વાં ગૌરનીલાઙ્ગરાજન્
    મૃગમદઘુસૃણાનુગ્રાહિણી નાગરેશૌ ।
સ્વમહિમપરમાણુપ્રાવૃતાશેષગન્ધા
    કિમિહ મમ ભવિત્રી ઘ્રાણભૃઙ્ગોત્સવાય ॥ ૩૦॥

પ્રદેશિનીં મુખકુહરે વિનિક્ષિપન્
    જનો મુહુર્વનભુવિ ફુત્કરોત્યસૌ ।
પ્રસીદતં ક્ષણમધિપૌ પ્રસીદતં
    દૃશોઃ પુરઃ સ્ફુરતુ તડિદ્ઘનચ્છવિઃ ॥ ૩૧॥

વ્રજમધુરજનવ્રજાવતંસૌ
    કિમપિ યુવામભિયાચતે જનોઽયમ્ ।
મમ નયનચમત્કૃતિં કરોતુ
    ક્ષણમપિ પાદનખેન્દુકૌમુદી વામ્ ॥ ૩૨॥

અતર્કિતસમીક્ષણોલ્લસિતયા મુદા શ્લિષ્યતો-
    ર્નિકુઞ્જભવનાઙ્ગને સ્ફુરિતગૌરનીલાઙ્ગયોઃ ।
રુચઃ પ્રચુરયન્તુ વાં પુરટયૂથિકામઞ્જરી
    વિરાજદલિરમ્યયોર્મમ ચમત્કૃતિં ચક્ષુષોઃ ॥ ૩૩॥

સાક્ષાત્કૃતિં બત યયોર્ન મહત્તમોઽપિ
    કર્તું મનસ્યપિ મનાક્ પ્રભુતામુપૈતિ ।
ઇચ્છન્નયં નયનયોઃ પથિ તૌ ભવન્તૌ
    જન્તુર્વિજિત્ય નિજગાર ભિયં હ્રિયં ચ ॥ ૩૪॥

અથવા મમ કિં નુ દૂષણં
    બત વૃન્દાવનચક્રવર્તિનૌ ।
યુવયોર્ગુણમાધુરી નવા
    જનમુન્માદયતીવ કં ન વા ॥ ૩૫॥

અહહ સમયઃ સોઽપિ ક્ષેમો ઘટેત નરસ્ય કિં

વ્રજનટવરૌ યત્રોદ્દીપ્તા કૃપાસુધયોજ્જ્વલા ।
કૃતપરિજનશ્રેણિચેતશ્ચકોરચમત્કૃતિ-
ર્વ્રજતિ યુવયોઃ સા વક્ત્રેન્દુદ્વયી નયનાધ્વનિ ॥ ૩૬॥

પ્રિયજનકૃતપાર્ષ્ણિગ્રાહચર્યોન્નતાભિઃ
સુગહનઘટનાભિર્વક્રિમાડમ્બરેણ ।
પ્રણયકલહકેલિક્ષ્વેલિભિર્વામધીશૌ
કિમિહ રચયિતવ્યઃ કર્ણયોર્વિસ્મયો મે ॥ ૩૭॥

નિભૃતમપહૃતાયામેતયા વંશિકાયાં
દિશિ દિશિ દૃશમુત્કાં પ્રેર્ય સમ્પૃચ્છમાનઃ ।
સ્મિતશવલમુખીભિર્વિપ્રલબ્ધઃ સખીભિ-
સ્ત્વમઘહર કદા મે તુષ્ટિમક્ષ્ણોર્વિધત્સે ॥ ૩૮॥

ક્ષતમધરદલસ્ય સ્વસ્ય કૃત્વા ત્વદાલી
કૃતમિતિ લલિતયાં દેવિ કૃષ્ણે બ્રુવાણે ।
સ્મિતશવલદૃગન્તા કિઞ્ચિદુત્તમ્ભિતભ્રૂ-
ર્મમ મુદમુપધાસ્યત્યાસ્યલક્ષ્મીઃ કદા તે ॥ ૩૯॥

કથમિદમપિ વાઞ્છિતું નિકૃષ્ટઃ
સ્ફુટમયમર્હતિ જન્તુરુત્તમાર્હમ્ ।
ગુરુલઘુગણનોજ્ઝિતાર્તનાથૌ
જયતિતરામથવા કૃપાદ્યુતિર્વામ્ ॥ ૪૦॥

વૃત્તે દૈવાદ્ વ્રજપતિસુહૃન્નન્દિનીવિપ્રલમ્ભે
સંરમ્ભેણોલ્લલિત લલિતાશઙ્કયોદ્ભ્રાન્તનેત્રઃ ।
ત્વં શારીભિઃ સમયપટુભિર્દ્રાગ્ ઉપાલભ્યમાનઃ
કામં દામોદર મમ કદા મોદમક્ષ્ણોર્વિધાતા ॥ ૪૧॥

રાસારમ્ભે વિલસતિ પરિત્યજ્ય ગોષ્ઠામ્બુજાક્ષી
વૃન્દં વૃન્દાવનભુવિ રહઃ કેશવેનોપનીય ।
ત્વાં સ્વાધીનપ્રિયતમપદપ્રાપણેનાર્ચિતાઙ્ગીં
દૂરે દૃષ્ટ્વા હૃદિ કિમચિરાદર્પયિષ્યામિ દર્પમ્ ॥ ૪૨॥

રમ્યા શોણદ્યુતિભિરલકૈર્યાવકેનોર્જદેવ્યાઃ
સદ્યસ્તન્દ્રીમુકુલદલસક્લાન્તનેત્રા વ્રજેશ ।
પ્રાતશ્ચન્દ્રાવલીપરિજનૈઃ સાચિ દૃષ્ટા વિવર્ણૈ-

રાસ્યશ્રીસ્તે પ્રણયતિ કદા સમ્મદં મે મુદં ચ ॥ ૪૩॥

વ્યાત્યુક્ષીરભસોત્સવેऽધરસુધાપાનગ્લહે પ્રસ્તુતે
જિત્વા પાતુમથોત્સુકેન હરિણા કણ્ઠે ધૃતાયાઃ પુરઃ ।
ઈષચ્છોણિમમીલિતાક્ષમનૃજુભ્રૂવલ્લિહેલોન્નતં
પ્રેક્ષિષ્યે તવ સસ્મિતં સરુદિતં તદ્ દેવિ વક્ત્રં કદા ॥ ૪૪॥

આલીભિઃ સમમભ્યુપેત્ય શનકૈર્ગાન્ધર્વિકાયાં મુદા
ગોષ્ઠાધીશકુમાર હન્ત કુસુમશ્રેણીં હરન્ત્યાં તવ ।
પ્રેક્ષિષ્યે પુરતઃ પ્રવિશ્ય સહસા ગૂઢસ્મિતાસ્યં બલાદ્
આચ્છિન્દાનમિહોત્તરીયમુરસસ્ત્વાં ભાનુમત્યાઃ કદા ॥ ૪૫॥

ઉદઞ્ચતિ મધૂત્સવે સહચરીકુલેનાકુલે કદા
ત્વમવલોક્યસે વ્રજપુરન્દરસ્યાત્મજ ।
સ્મિતોજ્જ્વલમદીશ્વરીચલદૃગઞ્ચલપ્રેરણાન્
નિલીનગુણમઞ્જરીવદનમત્ર ચુમ્બન્ મયા ॥ ૪૬॥

કલિન્દતનયાતટિવનવિહારતઃ શ્રાન્તયોઃ
સ્ફુરન્મધુરમાધવીસદનસીમ્નિ વિશ્રામ્યતોઃ ।
વિમુચ્ય રચયિષ્યતે સ્વકચવૃન્દમત્રામુના
જનેન યુવયોઃ કદા પદસરોજસન્માર્જનમ્ ॥ ૪૭॥

પરિમિલદુપબર્હં પલ્લવશ્રેણિભિર્વાં
મદનસમરચર્યાભારપર્યાપ્તમત્ર ।
મૃદુભિરમલપુષ્પૈઃ કલ્પયિષ્યામિ તલ્પં
ભ્રમરયુજિ નિકુઞ્જે હા કદા કુઞ્જરાજૌ ॥ ૪૮॥

અલિદ્યુતિભિરાહૃતૈર્મિહિરનન્દિનીનિર્ઝરાત્
પુરઃ પુરટઝર્ઝરીપરિભૃતૈઃ પયોભિર્મયા ।
નિજપ્રણયિભિર્જનૈઃ સહ વિધાસ્યતે વાં કદા
વિલાસશયનસ્થયોરિહ પદામ્બુજક્ષાલન ॥ ૪૯॥

લીલાતલ્પે કલિતવપુષોર્વ્યાવહાસીમનલ્પાં
સ્મિત્વા સ્મિત્વા જયકલનયા કુર્વતોઃ કૌતુકાય ।
મધ્યે કુઞ્જં કિમિહ યુવયોઃ કલ્પયિષ્યામ્યધીશૌ
સન્ધારમ્ભે લઘુ લઘુ પદામ્ભોજસંવાહનાનિ ॥ ૫૦॥

પ્રમદમદનયુદ્ધારમ્ભસમ્ભાવુકાભ્યાં
 પ્રમુદિતહૃદયાભ્યાં હન્ત વૃન્દાવનેશૌ ।
કિમહમિહ યુવાભ્યાં પાનલીલોન્મુખાભ્યાં
 ચષકમુપહરિષ્યે સાધુ માધ્વીકપૂર્ણમ્ ॥ ૫૧॥

કદાહં સેવિષ્યે વ્રતતિચમરીચામરમરુદ્
 વિનોદેન ક્રીડાકુસુમશયને ન્યસ્તવપુષૌ ।
દરોન્મીલન્નેત્રૌ શ્રમજલકણક્લિદ્યદલકૌ
 બ્રુવાણાવન્યોન્યં વ્રજનવયુવાનાવિહ યુવામ્ ॥ ૫૨॥

ચ્યુતશિખરશિખણ્ડં કિઞ્ચિદુત્સ્રંસમાનાં
 વિલુઠદમલપુષ્પશ્રેણિમુન્મુચ્ય ચૂડામ્ ।
દનુજદમન દેવ્યાઃ શિક્ષયા તે કદાહં
 કમલકલિતકોટિં કલ્પયિષ્યામિ વેણીમ્ ॥ ૫૩॥

કમલમુખિ વિલાસૈરંસયોઃ સ્રંસિતાનાં
 તુલિતશિખિકલાપં કુન્તલાનાં કલાપમ્ ।
તવ કવરતયાવિર્ભાવ્ય મોદાત્ કદાહં
 વિકચવિચકિલાનાં માલયાલઙ્કરિષ્યે ॥ ૫૪॥

મિથઃસ્પર્ધાબદ્ધે બલવતિ વલત્યક્ષકલહે
 વ્રજેશ ત્વાં જિત્વા વ્રજયુવતિધમ્મિલ્લમણિના ।
દૃગન્તેન ક્ષિપ્તાઃ પણમિહ કુરઙ્ગં તવ કદા
 ગ્રહીષ્યામો બદ્ધ્વા કલયતિ વયં તત્પ્રિયગણે ॥ ૫૫॥

કિં ભવિષ્યતિ શુભઃ સ વાસરો
 યત્ર દેવિ નયનાઞ્ચલેન મામ્ ।
ગર્વિતં વિહસિતું નિયોક્ષ્યસે
 દ્યૂતસંસદિ વિજિત્ય માધવમ્ ॥ ૫૬॥

કિં જનસ્ય ભવિતાસ્ય તદ્ દિનં
 યત્ર નાથ મુહુરેનમાદૃતઃ ।
ત્વં વ્રજેશ્વરવયસ્યનન્દિની
 માનભઙ્ગવિધિમર્થયિષ્યસે ॥ ૫૭॥

ત્વદાદેશં શારીકથિતમહમાકર્ણ્ય મુદિતો
 વસામિ ત્વત્કુણ્ડોપરિ સખિ વિલમ્બસ્તવ કથમ્ ।

ઇતીદં શ્રીદામસ્વસરિ મમ સન્દેશકુસુમં
 હરેતિ ત્વં દામોદર જનમમું નોત્સ્યસિ કદા ॥ ૫૮॥

શઠોઽયં નાવેક્ષ્ય પુનરિહ મયા માનધનયા
 વિશન્તં સ્ત્રીવેશં સુબલસુહૃદં વારય ગિરા ।
ઇદં તે સાકૂતં વચનમવધાર્યોચ્છલિતધીશ્-
 છલાટોપૈર્ગોપપ્રવરમવરોત્સ્યામિ કિમહમ્ ॥ ૫૯॥

અઘહર બલીવર્દઃ પ્રેયાન્નવસ્તવ યો વ્રજે
 વૃષભવપુષા દૈત્યેનાસૌ બલાદભિયુજ્યતે ।
ઇતિ કિલ મૃષાગીર્ભિશ્ચન્દ્રાવલીનિલયસ્થિતં
 વનભુવિ કદા નેષ્યામિ ત્વાં મુકુન્દ મદીશ્વરીમ્ ॥ ૬૦॥

નિગિરતિ જગદુચ્ચૈઃ સૂચિભેદ્યે તમિસ્રે
 ભ્રમરરુચિનિચોલેનાઙ્ગમાવૃત્ય દીપ્રમ્ ।
પરિહૃતમણિકાઞ્ચીનૂપુરાયાઃ કદાહં
 તવ નવમભિસારઋઅં કારૂઅયિષ્યામિ દેવિ ॥ ૬૧॥

આસ્યે દેવ્યાઃ કથમપિ મુદા ન્યસ્તમાસ્યાત્ ત્વયેશ
 ક્ષિપ્તં પર્ણે પ્રણયજનિતાદ્ દેવિ વામ્યાત્ ત્વયાગ્રે ।
આકૂતજ્ઞસ્તદતિનિભૃતં ચર્વિતં ખર્વિતાઙ્ગ-
 સ્તામ્બૂલીયં રસયતિ જનઃ ફુલ્લરોમા કદાયમ્ ॥ ૬૨॥

પરસ્પરમપશ્યતોઃ પ્રણયમાનિનોર્વાં કદા
 ધૃતોત્કેલિકયોરપિ સ્વમભિરક્ષતોરાગ્રહમ્ ।
દ્વયોઃ સ્મિતમુદઞ્ચયે નુદસિ કિં મુકુન્દામુના
 દૃગન્તનટનેન મામુપરમેત્યલીકોક્તિભિઃ ॥ ૬૩॥

કદાપ્યવસરઃ સ મે કિમુ ભવિષ્યતિ સ્વામિનૌ
 જનોઽયમનુરાગતઃ પૃથુનિ યત્ર કુઞ્જોદરે ।
ત્વયા સહ તવાલિકે વિવિધવર્ણગન્ધદ્રવ્યૈશ્-
 ચિરં વિરચયિષ્યતિ પ્રકટપત્રવલ્લીશ્રિયમ્ ॥ ૬૪॥

ઇદં સેવાભાગ્યં ભવતિ સુલભં યેન યુવયોશ્-
 છટાપ્યસ્ય પ્રેમ્ણઃ સ્ફુરતિ નહિ સુપ્તાવપિ મમ ।
પદાર્થેઽસ્મિન્ યુષ્મદ્વ્રજમનુ નિવાસેન જનિત-
 સ્તથાપ્યાશાબન્ધઃ પરિવૃઢવરૌ માં દ્રઢયતિ ॥ ૬૫॥

પ્રપદ્ય ભવદીયતાં કલિતનિર્મલપ્રેમભિ-
    ર્મહદ્ભિરપિ કામ્યતે કિમપિ યત્ર તાર્ણં જનુઃ ।
કૃતાત્ર કુજનેરપિ વ્રજવને સ્થિતિર્મે યયા
    કૃપાં કૃપણગામિનીં સદસિ નૌમિ તામેવ વામ્ ॥ ૬૬॥

માધવ્યા મધુરાઙ્ગ કાનનપદપ્રાપ્તાધિરાજ્યશ્રિયા
    વૃન્દારણ્યવિકાસિસૌરભતતે તાપિઞ્છકલ્પદ્રુમ ।
નોત્તાપં જગદેવ યસ્ય ભજતે કીર્તિચ્છટાચ્છાયયા
    ચિત્રા તસ્ય તવાઙ્ઘ્રિસન્નિધિજુષાં કિં વા ફલાપ્તિર્નૃણામ્ ॥ ૬૭॥

ત્વલ્લીલામધુકુલ્યયોલ્લસિતયા કૃષ્ણામ્બુદસ્યામૃતૈઃ
    શ્રીવૃન્દાવનકલ્પવલ્લિપરિતઃ સૌરભ્યવિસ્ફારયા ।
માધુર્યેણ સમસ્તમેવ પૃથુના બ્રહ્માણ્ડમપ્યાયિતં
    નાશ્ચર્યં ભુવિ લબ્ધપાદરજસાં પર્વોન્નતિર્વીરુધામ્ ॥ ૬૮॥

પશુપાલવરેણ્યનન્દનૌ
    વરમેતં મુહુરર્થયે યુવામ્ ।
ભવતુ પ્રણયો ભવે ભવે
    ભવતોરેવ પદામ્બુજેષુ મે ॥ ૬૯॥

ઉદ્ગીર્ણાભૂદુત્કલિકાવલ્લરિરગ્રે
    વૃન્દાટાવ્યાં નિત્યવિલાસવ્રતયોર્વામ્ ।
વાઙ્માત્રેણ વ્યાહરતોઽપ્યુલ્લલમેતાં
    આકર્ણ્યેશૌ કામિતસિદ્ધિં કુરુતં મે ॥ ૭૦॥

ચન્દ્રાશ્વભુવને શાકે પૌષે ગોકુલવાસિના ।
ઇયમુત્કલિકાપૂર્વા વલ્લરી નિર્મિતા મયા ॥ ૭૧॥

(૧૪૭૧ શકાબ્દે, ૧૫૫૦ ખૃષ્ટાબ્દે)

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં ઉત્કલિકાવલ્લરી સમાપ્તા ।

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*